सीतामऊ नरेश महाराज रामसिंह विरचिता श्रीरामस्तुति विषयक श्लोकाः

हे नीलकण्ठ ! भगवन् ! महनीयकीर्ते !
ज्ञातो न कोऽपि भगवत्सदृशो वदान्यः।
वाञ्छां ममापि परिपूरय शीघ्रमेकां
मह्यं प्रदेहि रघुनाथपदानुरागम्॥ १ ॥

यद्भासैव विभाति विश्वमखिलं यस्मान्न तत्वं परम्
आनन्दैकमयो हरप्रियतरः शान्तस्सदैवाक्रियः।
चिद्रूपो त्रिगुणादिदोषरहितो नित्यो निरीहो महान्
तं ध्यायेत्सदचिन्त्यरूपमनिशं रामं परं पूरुषम्॥ २ ॥

यस्य भ्रूभङ्ग मात्रेण लीयते सकलं जगत्।
तं सर्वकामदं रामं वन्देऽहं रघुनंदनम्॥ ३ ॥

हे राम ! हे ! रघुपते जगदेकनाथ !
हे जानकीरमण ! हे रघुवंशकेतो !
नान्यद् ममास्ति भुवने खलु वाञ्छनीयम्।
गाढं प्रदेहि भगवच्चरणानुरागम्॥ ४ ॥

यस्या दुःखाग्निना दग्धा लंका सर्वा ह्यनाथवत्।
तां सीतां शिरसा वन्दे भक्तानां सुखदायिनीम्॥ ५ ॥

यस्य दयालवेनापि नश्यते निखिलं तमः।
वन्देऽहं तं जगद्वंद्यं रामरूपं परं गुरुम्॥ ६ ॥

गुरवो मे बहवोऽन्ये सर्वे मे ज्ञानदायिनः।
तानहं शिरसा वन्दे तमोऽज्ञानविनाशिनः॥ ७ ॥

मया हि किञ्चित् सुकृतं कृतं न
भक्तिं पितुर्वीक्ष्य करोमि धार्ष्ट्यम्।
त्वया विभोऽहं सुदयाभिलाषी
त्वद्भक्तपुत्रोऽयमवेक्षणीयः ॥ ८ ॥

राज्यं धनं परिजनस्तनयः कलत्रं
किं किं त्वया रघुपते भुवि मे न दत्तम्।
जन्मार्तिनाशनविधौ विफलं तु सर्व
मेकां दयामय ! विना भवदीय भक्तिम्॥ ९ ॥

जराग्रस्तं जीर्णं भवति तव देहं प्रतिदिनम्
न कश्चिद्विश्वासो निपतति कृतान्तस्त्वयि कदा।
तथाप्याश्चर्यं भो ! न तव विरतिर्निन्द्यविषयात्
गतो वाद्यापि त्वं न हि रघुपतेः पादशरणम्॥ १० ॥

गतस्य कालस्य कुतोपलब्धिः
सर्वं भविष्यन्तु हरावधीनम्।
अस्मिन्नतस्त्वं कुरु वर्तमाने
ध्यानेन रामः सफलं हि जन्म ॥ ११ ॥

यत्स्पर्शनाद् गौतमधर्मपत्नी
विमुक्तपापा हि गता पतिं सा।
तद्रामपादाम्बुजपुण्यधूलेः
पुनातु सद्यः स्मरणं मनो मे ॥ १२ ॥

गायं-गायं रघुवरगुणान् पावनान् श्रोत्ररम्यान्
वारं-वारं सुमनसि जपद्रामनामैकमंत्रम्।
ध्यायं-ध्यायं जलधरनिभं मंजुलं रामरूपम्
वेदं-वेदं दृढ़हरिरतिं यातु मे शेषमायुः ॥ १३ ॥